CAREERINDIA

# आदर्शप्रश्नपत्रम् – 2019-20
## संस्कृतम् (केन्द्रिकम्)
## Sanskrit Core (322)
## कक्षा – XII

**समयः – होरात्रयम्** **पूर्णाङ्काः - 80**

**सामान्यनिर्देशाः -**

- कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 10 पृष्ठानि मुद्रितानि सन्ति।
- कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 18 प्रमुखाः प्रश्नाः सन्ति।
- उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमाङ्कः अवश्यं लेखनीयः।
- अस्य प्रश्नपत्रस्य पठनाय 15 निमेषाः निर्धारिताः सन्ति। अस्मिन् अवधौ केवलं प्रश्नपत्रं पठनीयम् उत्तरपुस्तिकायां च किमपि न लेखनीयम्।

**प्रश्नपत्रस्वरूपम् -**

**अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति -**

| | |
|---|---|
| **खण्डः (क) अपठित-अवबोधनम्** | - 10 अङ्काः |
| **खण्डः (ख) रचनात्मककार्यम्** | - 15 अङ्काः |
| **खण्डः (ग) अनुप्रयुक्तव्याकरणम्** | - 20 अङ्काः |
| **खण्डः (घ) I. पठित-अवबोधनम्** | - 25 अङ्काः |
| II. **संस्कृत - साहित्येतिहास - परिचयः** | - 10 अङ्काः |

(i) अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।

(ii) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।

(iii) प्रश्नसङ्ख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।

(iv) सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।

(v) प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः।

www.careerindia.com

## खण्डः – क

## अपठित – अवबोधनम् - 10 अङ्काः

1. **अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानामुत्तराणि संस्कृतेन लिखत -**

एकदा भगवान् बुद्धः राजमार्गे गच्छन् अपश्यत् यत् सरोवरतटे कश्चन भिक्षुः स्नात्वा भूयो-भूयः हस्तौ संयोज्य षड्दिशः प्रणमति स्म। बुद्धः तमुपगम्य अपृच्छत् – महाशय ! किं भवान् जानाति यत् दिग्भ्यः प्रणामनिवेदनस्य कः अभिप्रायः अस्ति? भिक्षुः उदतरत् - भगवन् ! नाहं जाने अस्य अभिप्रायम्। कृपया भवान् एव अभिज्ञापयतु। बुद्धः अकथयत् – पूर्वदिशि कृतः नमस्कारः तु मातापितृभ्यां गृहस्वामिने च भवति। दक्षिणदिक् आचार्याय, पश्चिमदिक् स्त्रीपुत्रादिभ्यः, उत्तरदिक् च मित्रादीनां कृते भवति। एवमेव ऊर्ध्वदिक् श्रमणब्राह्मणेभ्यः अधोदिक् च सेवकेभ्यः भवति। इदं श्रुत्वा भिक्षुः अब्रवीत् – सेवकेभ्यः किमर्थं प्रणामः? वयं तु श्रेष्ठाः अतः सेवकाः एव अस्मान्नमेयुः। तदा तथागतः अकथयत् – सेवकाः अपि अस्मद्वत् मनुष्याः सन्ति। तान् प्रति प्रणामः अस्मत्स्नेहं वात्सल्यं सौहार्दञ्च सूचयति।

**(अ) एकपदेन उत्तरत - (अवबोधनात्मकप्रश्नः) केवलं प्रश्नचतुष्टयम्** ½×4=2

(i) भगवान् बुद्धः कुत्र गच्छन् अपश्यत्?

(ii) के अस्मद्वत् मनुष्याः भवन्ति?

(iii) पश्चिमदिशि कृतः प्रणामः केभ्यः भवति?

(iv) कः भूयो भूयः षड्दिशः प्रणमति स्म?

(v) `सेवकाः अपि अस्मद्वत् मनुष्याः सन्ति' इति कः कथयति?

**(आ) पूर्णवाक्येन उत्तरत - (अवबोधनात्मकप्रश्नः) केवलं प्रश्नद्वयम्** 2×2=4

(i) भगवान् बुद्धः भिक्षुं कस्य अभिप्रायं पृच्छति?

(ii) सेवकान् प्रति प्रणामः किं किं सूचयति?

(iii) का दिक् केभ्यः प्रणामाय भवति?

**(इ) अनुच्छेदस्य (द्वित्रिशब्दात्मकं) समुचितं शीर्षकं लिखत।(चिन्तनात्मकप्रश्नः)** 1×1=1

**(ई) यथानिर्देशम् उत्तरत- (ज्ञानात्मकप्रश्नः) (एकपदात्मकम् उत्तरम्) केवलं प्रश्नत्रयम्** 1×3=3

(i) **"तान् प्रति प्रणामः अस्माकं ....."** इत्यस्मिन् वाक्ये 'तान्' इति सर्वनामपदं केभ्यः प्रयुक्तम्?

(ii) **"इदं श्रुत्वा भिक्षुः अब्रवीत्"** इत्यस्मिन् वाक्ये **भिक्षुः** इति कर्तृपदस्य किं क्रियापदं प्रयुक्तम्?

(iii) **"भगवान् बुद्धः"** इत्यनयोः पदयोः किं विशेषणपदम्?

(iv) **"आगच्छन्"** इति पदस्य विलोमपदं गद्यांशात् चित्वा लिखत।

www.careerindia.com

CAREERINDIA

**खण्डः – ख**

**रचनात्मक–कार्यम्** - 15 **अङ्काः**

2. भवान् / भवती रमेशः / रमा। शैक्षिक - भ्रमण - दले समावेशाय प्रधानाचार्यां प्रति लिखिते आवेदन पत्रे रिक्तस्थानानि मञ्जूषातः चित्वा, पूरयित्वा च पुनः पत्रं लिखत – ½×10=5

**(रचनात्मकवाक्यानि – चिन्तनात्मकप्रश्नः)**

सेवायाम्

(i).................................

राजकीयसर्वोदयसहशिक्षाविद्यालयः, सुल्तानपुरी

विषयः - (ii) .........................।

मान्याः !

सादरं (iii) ............. अस्ति यद् अहम् एतस्मिन् (iv) .............. नवमकक्षायाम् 'अ' वर्गे पठामि। एवं मया श्रूयते यद् आगामिनि शीतकाले अस्माकं विद्यालयात् किमपि (v) ........................ नैनीतालं गमिष्यति। नूतन-स्थलानां दर्शने, नूतन-तथ्यानां ज्ञानार्जने च मम (vi) ......................... अभिरुचिः। अतः अहम् अपि (vii) ......................... दलेन सह गन्तुम् इच्छामि। एतदर्थं मया माता-पितृभ्याम् (viii) ......................... अपि प्राप्ता। साग्रहं (ix) ......................... यद् एतदर्थम् अनुमतिं प्रदाय (x) ......................... अयं जनः।

सधन्यवादम्,

भवतां विनीतः शिष्यः /विनीता शिष्या,

रमेशः / रमा

**मञ्जूषा**

| |
|---|
| अनेन, महती, अनुमतिः, प्रार्थयामि, कृतार्थीकरणीयः, निवेदनीयम्, प्रधानाचार्याः, विद्यालये, शैक्षिभ्रमणदलम्, शैक्षिकभ्रमणदले समावेशाय निवेदनम् । |

3. **मञ्जूषाप्रदत्त-पदसहायतया अधोलिखितां कथां पूरयत -** ½×10=5

**(रचनात्मकवाक्यानि –चिन्तनात्मकप्रश्नः)**

एकदा स्वामिविवेकानन्दः (i) .................. सङ्कटमोचन-मन्दिरात् दर्शनं कृत्वा आगच्छन् आसीत्। तस्य हस्ते भगवते (ii) ..................... नैवेद्यम् आसीत्। मन्दिरपरिसरे एव केचन वानराः तं परितः आगत्य नैवेद्यम् अपहर्तुं (iii) ...................... स्म। विवेकानन्दः (iv) ......................... सन् धावनम् आरब्धवान् वानराः अपि विवेकानन्दम् अनुधावितवन्तः तत्रैव एकः (v) ............. एतद् सर्वं पश्यन्नासीत्। सः विवेकानन्दम् उच्चैः उक्तवान् तिष्ठ, भयं मा कुरु, तत्रैव (vi) .................. आगतं सङ्कटं (vii) ............। विवेकानन्दः तथैव कृतवान्। विवेकानन्दे (viii).................. सति वानराः पलायितवन्तः। अस्माकं (ix) ............... अपि पलायनप्रवृत्तिः (x)................ इति चिन्तनीयम्।

www.careerindia.com

**मञ्जूषा-**

| |
|---|
| वाराणस्याम् , प्रयतन्ते, जीवने, अर्पितम् , संन्यासी, स्थित्वा, नागच्छेत्, भयाक्रान्तः, प्रत्यक्षीकुरु, स्थिते। |

4. **"अनुशासनम्" इति विषयमधिकृत्य पञ्चवाक्यमितम् अनुच्छेदं लिखत। (मञ्जूषाप्रदत्तपदानां सहायता अपेक्षिता चेत् गृहीतव्या अन्यथा स्वयं चिन्तयित्वा स्वतन्त्ररूपेण लेखितव्यम्।) (रचनात्मकवाक्यानि –चिन्तनात्मकप्रश्नः)** 1×5=5

**मञ्जूषा-**

| |
|---|
| जीवने, आवश्यकम्, सर्वत्र, पालनम्, आज्ञायाः, आदेशानाम्, पतनस्य, अनुशासनहीनः, संविधाने, विद्यालयस्य, देशस्य, विद्यार्थिनाम्, कर्त्तव्यम्। |

**अथवा**

**निम्नलिखितवाक्येषु केषाञ्चन पञ्चवाक्यानां संस्कृतेन अनुवादं कुरुत –** 1×5=5
**(समाधान-प्रगतचिन्तनात्मकप्रश्नः)**

1. हिमालय से लेकर समुद्र तक भारत की सीमा है।
2. छात्रों की प्रतिवर्ष षाण्मासिक और वार्षिक परीक्षा होती है।
3. कल विद्यालय में अवकाश होगा।
4. आकाश तारों से युक्त है।
5. राजा राज्य की रक्षा करता है।
6. क्या तुम वहाँ नही जाओगे?
7. गरुड़ आकाश में उड़ता है।

1. India's border from the Himalayas to the sea.
2. Students appear for half yearly and annual examination every year.
3. School will remain closed tomorrow.
4. The sky is studded with stars.
5. The King defends the state.
6. Will not you go there?
7. A `*Garuda*´ flies in the sky.

CAREERINDIA

## खण्डः - ग

## अनुप्रयुक्तव्याकरणम्  20 अङ्काः

5. **अधोलिखितवाक्येषु रेखाङ्कितपदानां सन्धिं सन्धिच्छेदं वा कुरुत - (केवलं प्रश्नषट्कम्)** 1×6=6

**(आकाङ्क्षात्मकप्रश्नः)**

(i) छन्दकं चाब्रवीत्प्रीतः <u>स्नापयन्निव</u> चक्षुषा।

(ii) <u>मयैकाकिना</u> किलगन्तव्यम्?

(iii) दिलीप इव राजेन्दुरिन्दुः <u>क्षीरनिधाविव</u>।

(iv) स पिता <u>पितरः+तासाम्</u> केवलं जन्महेतवे।

(v) त्यज! नाहं <u>पुनरायास्यामि</u>।

(vi) मानं <u>लभन्ते +अतितरां</u> जगत्याम्।

(vii) चञ्चा फलानि विमलानि <u>समञ्चयन्तः</u>।

(viii) इदमस्तीदमपि मे भविष्यति <u>पुनर्धनम्</u>।

6. **निम्नलिखितवाक्येषु रेखाङ्कित-पदानां समासं विग्रहं वा कुरुत - (केवलं प्रश्नपञ्चकम्)** 1×5=5

**(अवबोधनात्मकः प्रश्नः)**

(i) मुञ्च त्वं मामहं <u>कृतनिश्चयः</u>।

(ii) जनः <u>कामं च क्रोधं च लोभं च</u> त्यजेत्।

(iii) राजकुमारी मदालसा <u>सर्वविद्यासु निष्णाता</u> जाता।

(iv) <u>गजेन्द्रम् आरुढः</u> भोजो राजभवनमगात्।

(v) परस्परम् अनुव्रतौ पतिपत्न्यौ <u>त्रयाणां वर्गाणां समाहारं</u> साधयतः।

(vi) राजा सौधं <u>निर्जनं</u> विधाय वत्सराजं प्राह।

(vii) दोषेषु एव खलानां <u>महायत्नः</u> भवति।

(viii) <u>पतिगृहं</u> गमिष्यसि तदाहम् एकाकिनी भविष्यामि।

7. **अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृतिप्रत्ययं योजयत पृथक् वा कुरुत – (केवलं प्रश्नषटकम्)** **(अवबोधनात्मकः प्रश्नः)** 1x6=6

(i) जरामरणनाशार्थं <u>प्रविष्टः</u> तपोवने।

(ii) युधिष्ठिरः द्रौपदीं सम्पत्तिं <u>मन्यमानः</u> द्युते हरितवान्।

(iii) तस्य शिरः मत्पार्श्वे <u>आ + नी + तव्यत्</u>।

(iv) अहं <u>बलवान्</u> सिद्धः सुखी च अस्मि।

(v) भव्यमूर्तिः <u>संन्यास + इनि</u> दृष्टः।

(vi) अद्यापि जननी <u>स्वतन्त्र + टाप्</u> न विहिता।

(vii) सैषा नरपामराणां भयकरी <u>स्थली</u> ।



www.careerindia.com

CAREERINDIA

8. **कोष्ठकप्रदत्तपदैः सह समुचितां विभक्तिं प्रयुज्य रिक्तस्थानपूर्तिं कुरुत – (केवलं प्रश्नत्रयम्)** 1×3=3

**(अवबोधनात्मकः प्रश्नः)**

(i) **(अस्मत्)** ..................... सदृशः अन्यः कः अस्ति?

(ii) नरी एव समस्तसृष्टेः निर्मात्री, परं **(कथन)** ........................... किम्?

(iii) अपि च **(सूर्य)** ........................... प्रति पूर्वाभिमुखा पृथिवी।

(iv) सः पुनः **(क्षण)** ........................... अनन्तरं तमेव पादध्वनिं श्रुतवान्।

(v) **(सत्य)** ........................... न प्रमदितव्यम्।

**खण्डः – घ भाग - I**

**पठितांशावबोधनम्** 25 **अङ्काः**

9. **अधोलिखितं गद्यांशं पठित्वा तदाधारितान् प्रश्नान् यथानिर्देशं संस्कृतेन उत्तरत -**

इह हि वाङ्मयमुभयथा शास्त्रं काव्यं च। शास्त्रं द्विधा-अपौरुषेयं पौरुषेयं च। अपौरुषेयं श्रुतिः। श्रुतिः पुनः द्विविधा मन्त्राः ब्राह्मणं च। विवृत्तक्रियातन्त्रा मन्त्राः। मन्त्राणां स्तुतिनिन्दाव्याख्यान-विनियोगग्रन्थो ब्राह्मणम्। ऋग्यजुः सामवेदास्त्रयी आथर्वणश्च तुरीयः। तत्रार्थव्यवस्थितपादाः ऋचः। ताः सगीतयः सामानि। अच्छन्दांस्यगीतानि यजूंषि। ऋचोयजूंषि सामानि चाथर्वणं त इमे चत्वारो वेदाः। इतिहासवेदः धनुर्वेदः गन्धर्ववेदः आयुर्वेदः च उपवेदाः। ''वेदोपवेदात्मा सार्ववर्णिकः पञ्चमो गेयवेदः'' इति द्रौहिणिः। ''शिक्षा, कल्पो, व्याकरणं, निरुक्तं, छन्दोविचितिः, ज्योतिषं च षडङ्गानि'' इत्याचार्याः। ''उपकारकत्वादलङ्कारः सप्तममङ्गम्'' इति यायावरीयः। ऋते च तत्स्वरूपपरिज्ञानाद्वेदार्थानवगतिः। यथा-

**द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते।**
**तयोरन्यः पिप्पलं स्वाद्वत्ति अनश्नन्न्यो अभिचाकशीति॥**

I. **एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)** ½×2=1

(i) तुरीयः कः अस्ति?

(ii) कुत्र उभयथा वाङ्मयम् अस्ति?

(iii) श्रुतिः कतिधा?

II. **पूर्णवाक्येन उत्तरत - (केवलं प्रश्नमेकम्)** 2×1=2

(i) शास्त्रं कतिविधं के च ते?

(ii) वेदत्रयी के सन्ति?

III. **यथानिर्देशम् उत्तरत - (केवलं प्रश्नचतुष्टयम्)** ½×4=2

(i) 'चतुर्थः' इत्यस्य समानार्थकपदं गद्यांशात् चित्वा लिखत।

(ii) 'पौरुषेयम्' इत्यस्य विलोमपदं गद्यांशात् चित्वा लिखत।

www.careerindia.com

(iii) 'विवृत्तक्रियाःमन्त्राः' अनयोः पदयोः विशेषणपदं किम्?

(iv) 'तयोरन्यः पिप्पलं स्वाद्वत्ति' अत्र 'अत्ति' इति क्रियापदस्य कर्तृपदं किम्?

(v) 'इमे' इति सर्वनामपदं केभ्यः प्रयुक्तम्?

10. **अधोलिखितं पद्यांशं पठित्वा तदाधारितान् प्रश्नान् यथानिर्देशं संस्कृतेन उत्तरत -**

मा कातराः! स्पृशत मां प्रिय-पारतन्त्र्याः!
अद्यापि यन्न विहिता जननी स्वतन्त्रा।
यत्रोदमेव गदतीव ततिस्तरूणां
शाखाकदम्ब-कृत-मर्मरमातनोति।।

I. **एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) निर्देशस्पष्टात्मकपदम् –अवबोधनात्मकप्रश्नः** ½×2=1

(i) अद्यापि का स्वतन्त्रा न विहिता?

(ii) तरूणां का गदति इव प्रतिभाति?

(iii) प्रिय-पारतन्त्र्याः कां न स्पृशत?

II. **पूर्णवाक्येन उत्तरत - (केवलं प्रश्नमेकम्)** 2×1=2

**निर्देशस्पष्टात्मकपदम् –अवबोधनात्मकप्रश्नः**

(i) कीदृशाः (जनाः) जननीं स्वतन्त्रां न विहितवन्तः?

(ii) यत्र तरूणां ततिः कथम् आतनोति?

III. **यथानिर्देशम् उत्तरत - (केवलं प्रश्नचतुष्टयम्) एकपदेन - ज्ञानात्मकप्रश्नः** ½×4=2

(i) 'गदति' इति क्रियापदस्य कर्तृपदं किम्?

(ii) 'मा कातराः! स्पृशत मां' - इत्यस्मिन् श्लोकांशे 'माम्' इति सर्वनामपदं कस्यै प्रयुक्तम्?

(iii) 'वृक्षाणाम्' इति पदस्य समानार्थकपदं किं प्रयुक्तम्?

(iv) 'परतन्त्रा' इत्यस्य विलोमपदं श्लोकात् चित्वा लिखत।

(v) 'जननी स्वतन्त्रा' अत्र किं विशेषणपदम्?

11. **अधोलिखितं नाट्यांशं पठित्वा तदाधारितान् प्रश्नान् यथानिर्देशं संस्कृतेन उत्तरत -**

संन्यासी - कथमस्मान् संन्यासिनोऽपि कठोरभाषणैस्तिरस्करोषि?

दौवारिकः- भगवन्! संन्यासी तुरीयाश्रमसेवीति प्रणम्यते, परन्तु प्रभूणामाज्ञामुल्लङ्घ्य निजपरिचयमददेवाऽऽयातीत्याक्रुश्यते।

संन्यासी - सत्यं क्षान्तोऽयमपराधः, परं संन्यासिनो ब्रह्मचारिणः पण्डिताः, स्त्रियो बालाश्च न किमपि प्रष्टव्याः। आत्मानम् अपरिचाययन्तोऽपि प्रवेष्टव्याः।

दौवारिकः- संन्यासिन्! संन्यासिन्! बह्वुक्तम्, विरम न वयं दौवारिका ब्रह्मणोऽप्याज्ञां प्रतीक्षामहे, केवलं महाराजशिववीरस्याज्ञां वयं शिरसा वहामः। प्राह्णे महाराजस्य सन्ध्योपासनसमये भवादृशानां प्रवेशसमयो भवति, न तु रात्रौ।



www.careerindia.com

I. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) निर्देशस्पष्टात्मकपदम् –अवबोधनात्मकप्रश्नः ½×2=1

(i) अस्मान् संन्यासिनोऽपि कैः तिरस्करोषि?

(ii) कः अयं क्षान्तः?

(iii) कस्य सन्ध्योपासनसमये भवादृशानां प्रवेशसमयो भवति?

II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नमेकम्) 2×1=2

निर्देशस्पष्टात्मकवाक्यम् –अवबोधनात्मकप्रश्नः

(i) के किमपि न प्रष्टव्याः?

(ii) वयं केवलं कस्याज्ञां शिरसा वहामः?

III. यथानिर्देशम् उत्तरत - (केवलं प्रश्नचतुष्टयम्) एकपदेन - ज्ञानात्मकप्रश्नः ½×4=2

(i) 'शिववीरस्याज्ञां वयं शिरसा वहामः? इत्यत्र 'वयम्' इति सर्वनामपदं केभ्यः प्रयुक्तम्?

(ii) 'अयम् अपराधः' इत्यनयोः पदयोः किं विशेषणपदम्?

(iii) 'दिवसे' इति पदस्य किं विलोमपदं नाट्यांशे प्रयुक्तम्?

(iv) 'विधातुः' इत्यस्य समानार्थकपदं नाट्यांशात् चित्वा लिखत।

(v) 'प्रतीक्षामहे' इति क्रियापदस्य कर्तृपदं किम्?

12. अधोलिखितस्य पद्यस्य भावार्थं मञ्जूषाप्रदत्तपदैः पूरयित्वा पुनः लिखत – ½×6=3

अवबोधनात्मकप्रश्नः

त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः।
कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत् ॥

भावार्थः –

कर्तव्याकर्तव्यं वर्णयन् भगवान् श्रीकृष्णः (i) ………… माध्यमेन अस्मान् सर्वान् (ii)……. यत् कामः क्रोधः (iii) …………. एतानि त्रीणि नरकस्य द्वाररूपाणि अतः यः जनः (iv) ……….. नाशं नेच्छति अपितु स्वकीयं कल्याणमिच्छति सः एतानि द्वाराणि (v) ……………। सर्वप्रयत्नैः च एतेषां त्रयाणां त्यागं कुर्यात् येनैतानि त्रीणि द्वाराणि सदैव तस्य कृते (vi) ………. तिष्ठेयुः। सः च उन्नति-पथि अग्रसरो भवेत्।

मञ्जूषा

| नोद्घाटयेत्, लोभश्च, आत्मनः, पिहितानि, बोधयति, अर्जुनस्य। |
|---|

अथवा

प्रदत्ते भावार्थत्रयात् शुद्धं भावार्थं चित्वा लिखत- 1×3=3

(क) सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रविः।

(i) रविः कतिगुणमुत्स्रष्टुं जलं गृह्णाति।



www.careerindia.com

(ii) चन्द्र सहस्रगुणमुत्कर्षितुं जलं पिबति
(iii) सूर्यः सहस्रधा दातुं जलं गृह्णाति।

**(ख) अनन्यशासनामुर्वीं शशासैकपुरीमिव।**

(i) न अन्यशासकेन शासितां पृथ्वीम् एकपुरीमिव।
(ii) अन्यशासकेन शासितां वसुधां शशास।
(iii) सर्वशासकेन शासितं गगनं शासनं चकार।

**(ग) सर्वस्य लोचनं शास्त्रम्।**

(i) शास्त्राणां ज्ञानं सर्वेषां लोचनं भवति।
(ii) शास्त्रलोचनं केवलं वीराणां भवति।
(iii) शास्त्राणां ज्ञानं केषाञ्चिदेव लोचनं भवति।

13. **अधोलिखित- श्लोकयोः प्रदत्ते अन्वये रिक्तस्थानपूर्तिं कुरुत –** ½×6=3

**चतुःपञ्चवाक्यानि - अवबोधनात्मकप्रश्नः**

**(क) एकेनापि सुपुत्रेण विद्यायुक्तेन साधुना।**
**आह्लादितं कुलं सर्वं यथा चन्द्रेण शर्वरी ॥**

**अन्वयः –**

एकेन अपि (i) ……. साधुना सुपुत्रेण सर्वं कुलम्(ii) ......... यथा (iii) ……. शर्वरी।

**(ख) शैशवेऽभ्यस्तविद्यानां यौवने विषयैषिणाम्।**
**वार्द्धके मुनिवृत्तीनां योगेनान्ते तनुत्यजाम् ॥**

**अन्वयः –**

शैशवे (iv) ……(रघुवंशिनां) यौवने (v) ………. वार्द्धके (vi) …….
अन्ते योगेन तनुत्यजाम्।

अथवा

**प्रश्नपत्रात् भिन्नं पाठ्यपुस्तकस्य श्लोकमेकं लिखित्वा तस्य भावार्थं लिखत-** 3×1=3

14. **'क' स्तम्भस्य वाक्यांशस्य 'ख' स्तम्भस्य वाक्यांशेन सह मेलनं कुरुत -** ½×4=2

**स्मृत्यात्मकः प्रश्नः**

| **'क' स्तम्भः** | **'ख' स्तम्भः** |
| --- | --- |
| (i) शाटीव सा जयति | (क) कुररी नु काचित् |
| (ii) मातेव रोदिति सखे! | (ख) मधुरं क्वणन्तः |
| (iii) "श्रीराम" नाम मधुरं | (ग) काञ्चनकाञ्चनीयाम् |
| (iv) शोभां दधात्युषसि | (घ) काचन हल्दीघाटी |

CAREERINDIA

15. **अधोलिखितेषु वाक्येषु रेखाङ्कितपदानां प्रसंगनुसारं शुद्धम् उत्तरं चित्वा लिखत –** ½×4=2

**(केवलं प्रश्नचतुष्टयम्) स्मृत्यात्मकः प्रश्नः**

(i) समानं वृक्षं **परिषस्वजाते**।

(क) शोभते (ख) राजते (ग) आलिङ्गते

(ii) **अनश्नन्न्यो:** अभिचाकशीति।

(क) अखादन् (ख)पिबन् (ग) अगच्छन्

(iii) न्यायैः सहस्रेण विवेक्री **मीमांसा**।

(क) वर्णनम् (ख) व्याख्या (ग) आशंशा

(iv) पुराण**प्रभेदः** एवेतिहासः।

(क) प्रकारः (ख) विस्तारः (ग) विचारः

(v) शब्दानाम**न्वाख्यानं** व्याकरणम्।

(क) निर्माणम् (ख) व्याख्यानम् (ग) संशोधनम्

**खण्डः – घ भाग - ii 10 अङ्काः**

**सामान्यसंस्कृतसाहित्यपरिचयः**

16. **अधोलिखितेषु कस्यापि एकस्य कवेः परिचयः संस्कृतेन लिखत -** 3×1=3

**(केवलं प्रश्नैकम् ) अवबोधनात्मकप्रश्नः**

(i) अश्वघोषः (ii) आचार्यः चाणक्यः (iii) बिल्हणः

**अथवा**

**मञ्जूषाप्रदत्तपदानां साहाय्येन अधोलिखितवाक्येषु रिक्तस्थानपूर्तिं कुरुत -** ½×6=3

(i) कालिदासः ............................ गीतिकाव्ये अलिखत्।

(ii) नाटके ............................ सन्धयः भवन्ति।

(iii) स्वप्नवासवदत्तम् ............................ रचितमस्ति।

(iv) मुद्राराक्षसे ............................ नास्ति।

(v) पद्यं ............................ भवति।

(vi) आख्यायिकायाः ............................ वृत्तं भवति।

| छन्दोयुक्तम्, द्वे, ऐतिहासिकम्, पञ्च, विदूषकः, भासेन। |
|---|

17. **गद्य-पद्य-नाटकस्य च विधानां मुख्यविशेषताः लिखत- (स्मृत्यात्मकः प्रश्नः)** 3×1=3

18. **चम्पूकाव्यस्य खण्डकाव्यस्य वा चत्वारि वैशिष्ट्यानि लिखत- (स्मृत्यात्मकः प्रश्नः)** 4×1=4

__________******** ___________***************_______________********__________



www.careerindia.com